Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 6 | ISSN : 2581- 6306

# पाणिनीय परिभाषा स्वरूप विवेचनम्

डॉ. सत्य प्रियः
सहायक प्रध्यापकः, संस्कृत विभागः,
जम्मू विश्वविद्यालयः, जम्मू, जम्मू कश्मीर।

**सारांशः -** सूत्रभेदेषु अन्यतमा परिभाषा, सा एवात्र चर्चयितव्या। परिभाषा शब्दस्तावत **परितो भाष्यते कार्यमनया सा परिभाषेति कथ्यते**। परिभाषाज्यानं विना व्याकरणशास्त्रस्य अनेकातिविशिष्टरहस्यानां बोधः न भवितुमर्हति। इह व्याकरणशास्त्रे परिभाषाशब्दोऽयं योगरूढ्या कंचिद्विशिष्टार्थमेवावबोधयति। सामान्यतः कथ्यते यत येन सूत्रेण वाक्येन वा अनियमप्रसंगेषु कश्चिद् नियमः विधीयते, तदेव सूत्रं वाक्यं वा परिभाषानाम्ना कथ्यते। इह व्याकरणशास्त्रे परिभाषाणां बहुशः प्रयोगः भवति। इत्थं अस्याः महत्वम् उपयोगित्वं वा स्पष्टमेव। अस्मादेव विषयोऽयं पत्रेऽस्मिन विस्तरेण चर्च्यते ।

मुख्यपदानि – परिभाषाप्रयोगः, सूत्रम् पाणिनीय व्याकरणम् बोधः नियमः वाक्यम्।

सृष्ट्यादावीश्वरप्रदत्तानां सर्वज्ञानमयानां[1] वेदानां सर्वविधज्ञानविज्ञानादिनाम् अधिष्ठानत्वात्[2] धर्मार्थकाममोक्षरूपादि-पुरुषार्थचतुष्टयसिद्ध्यादि-प्रयोजनावाप्त्यपि न तेन विना सम्भवतीति स्पष्टैव मनुमतिः। तत्रापि सांगोपांगवेदाध्ययेन विना न चेश्वरप्राप्त्यवसरः इति पाणिनीय-शिक्षाकारः-

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते[3]॥**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते[4] ॥**

अंगेष्वपि तत्र व्याकरणशास्त्रस्यैव प्राधान्यमिति भाष्यकारः - **षट्स्वंगेषु प्रधानं व्याकरणं, प्रधाने च कृतो यत्नो फलवान् भवति[5]**। मोक्षावाप्तिप्रसंगेऽपि तत्र व्याकरणस्योपयोगितेत्याह आचार्यभर्तृहरिः -

**इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।**
**इयं सा मोक्षमाणानां अजिह्मा राजपद्धतिः[6] ॥**

महाभाष्ये महर्षिणा पतंजलिना सूत्रमेव व्याकरणमिति प्रतिपादितम्। सूचनात सूत्रमिति सूत्रशब्दस्य व्युत्पत्तिः[7]। सूत्रतः एव शब्दाः प्रतिपद्यन्ते, शब्दानां निष्पत्तिर्भवति। उक्तं

**सूत्रेष्वेव हि तत् सर्वं यद्वृत्तौ यच्च वार्तिके।**
**सूत्रं योनिरिहार्थानां सूत्रे सर्वं प्रतिष्ठितम्[8] ।।**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

वृत्तौ, भाष्ये अथ च सर्वेषु व्याख्यानग्रन्थेषु च वर्णिताः तथ्याः सिद्धान्ताः वा सर्वे अपि पाणिनीय-सूत्रेष्वेवाबद्धा इति भावः। तत्र **अल्पाक्षरत्व**[9]मादि-सूत्रलक्षणं वायुपुराणे प्रतिपादितम्। आचार्येण पाणिनिना षड्विधानां सूत्राणां प्रवर्तनं स्वग्रन्थे कृतम्। यथा -

**संज्ञा च परिभाषा च विधिर्नियम एव च।**
**अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्**[10] ॥

सूत्रभेदेषु अन्यतमा परिभाषा, सा एवात्र चर्चयितव्या। परिभाषा शब्दस्तावत् **परितो भाष्यते कार्यमनया सा परिभाषेति कथ्यते**। परिभाषाज्ञानं विना व्याकरणशास्त्रस्य अनेकातिविशिष्टरहस्यानां बोधः न भवितुमर्हति। इह व्याकरणशास्त्रे परिभाषाशब्दोऽयं योगरूढ्या कंचिद्विशिष्टार्थमेवावबोधयति। सामान्यतः कथ्यते यत् येन सूत्रेण वाक्येन वा अनियमप्रसंगेषु कश्चिद् नियमः विधीयते, तदेव सूत्रं वाक्यं वा परिभाषानाम्ना कथ्यते। उक्तं यथा- **अनियमप्रसंगे नियमकारिणी परिभाषा इति**[11]। महर्षिणा स्वामिदयानन्दसरस्वतिना स्वपारिभाषिक इति नामके ग्रन्थे विषयेऽस्मिन् यच्चोक्तं तेनापि प्रकृतसिद्धान्त एव पुष्णाति- **अनियमे नियमकारिणी परिभाषा**[12]। सूत्राणामर्थप्रतिपादने, तत्प्रवृत्तौ, प्रायोगिक-प्रक्रियासु वा यान्यपि सन्देहस्थानानि भवन्ति, तेषां सर्वेषामेव निवारणमत्र परिभाषाभिरेव सम्भवति। यथा चोक्तं भगवता पतंजलिना- **परिभाषा पुनरेकदेशस्था सती सर्वं शास्त्रमभिज्वलयति प्रदीपवत्**[13]। वस्तुतः परिभाषा तावत् विध्यादिशास्त्रतात्पर्यस्पष्टीकरणपूर्वकं विधिशास्त्रप्रवृत्तिं शब्दसाधुत्वदिशा योजयति, असाधुत्वं च निवारयति। योगरूढत्वम् अनियमप्रसंगे नियमकारित्वम् इति योगार्थेन सह अपि स्वीक्रियते। अन्यत्रापि भाष्यकारः अधिकारप्रकारं वर्णयन् कथयति- **अधिकारो नाम त्रिप्रकारः ... कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति । यथा प्रदीपः सर्वं वेश्म अभिज्वलयति**[14]। विषयेऽस्मिन् आचार्यनागेशोऽपि कान्चित् प्राचीनां कारिकां पठन्नाह-

**एकदेशस्थिता शास्त्रभवने याति दीपताम्।**
**परितो व्यपृतां भाषां परिभाषां प्रचक्षते**[15] ॥

तत्र न्यासकारोऽपि- **परितो व्यापृता भाषा परिभाषा इति**। पदमंजरीकारस्तावत् तत्रैव एवं वक्ति- **परितः सर्वत्र पूर्वत्र परत्र व्यवह्रियते चानन्तरे च भाव्यते कार्यमनयेति करणे गुरोश्च हलः (अष्टा. 03.03.103) इति अकार प्रत्ययः**[16] इति सर्वत्रैव परिभाषा विषयोऽयं विस्तरेण विविक्तः प्राप्यते। एतैः सर्वैरपि प्रमाणैः व्याकरणशास्त्रे परिभाषा विषयस्यांपयोगिता अथ च प्राधान्यं सुस्पष्टतां याति।

तत्रापि किं च परिभाषाणां मूलमिति शास्त्रेषु नैव स्पष्ट-रूपेण किंचिद् प्राप्यते। तत्र पाणिनीय-अष्टाध्याय्यामपि परिभाषा इति शब्दस्य न तावत् स्पष्ट उल्लेखः प्राप्यते, तथापि वार्तिककारः कात्यायनः परिभाषा-शब्दस्य नाम्ना उल्लेखः करोति- **वर्णपाठ उपदेश इति चेत् तव कारणत्वात् परिभाषाया अनुपदेशः**[17]। अन्यत्रापि कात्यायनः **स्वरितेनाधिकारः**[18] इति सूत्रं परिभाषा-सूत्ररूपेण स्थापयन् आह- **अन्यनिर्देशस्तु निवर्तकस्तस्मात् परिभाषा**[19]। पुनरपि सामान्येन इदमेव स्वीक्रियते यत् परिभाषास्तावत् प्राचीनानां वैयाकरणानां सूत्रपाठानां काचित् विशिष्ट-वचनानि एव स्युः, इति **सीरदेव**[20]-**पुरुषोत्तमदेव**[21]-**कैयट-हरदत्तादयः**। तत्र सीरदेवेन- **परिभाषा हि न साक्षाद् पाणिनीयवचनानि, किं**

**तर्हि? नानाचार्याणाम्**[22]। इति प्रमाणैः इदं हि सुस्पष्टं भवति यत् परिभाषास्तावत् विध्यादिसूत्राणां प्रवृत्तौ सहायकरूपा एव अथ च तत्प्रवृत्तौ सारल्य-करणार्थमेव च तासामुपयोगः।

परिभाषाणां किं च मूलमिति विचारानन्तरं किं मुख्यं लक्ष्यमित्यपि विचारणीयः। प्रायशः एतद्धि स्वीक्रियते यत् विधि-संज्ञादि-सूत्राणां प्रवृत्तौ कदाचित् पाक्षिकरूपेण अथवा स्थूलरूपेण विचारणे सूत्रेषु अव्याप्ति-अतिव्याप्ति-असंभवादि दोषाः अपि प्रतीयन्ते, यद्यपि सूक्ष्मेक्षया विवेचने तेऽपि निवृत्ता भवन्ति, इति तेषामेव निवरणार्थम् एतासां परिभाषाणां प्रवृत्तिरिति अवधेयम्|

अव्याप्तौ तावत् **एरुः**[23] इति सूत्रेण लोडादेशानाम् इकारस्य उकारादेशो विधीयते। तत्र पचतु, पचन्तु इति रुप-सिद्धिः भवति। अत्र हि शंकेयमुदेति यत् **सुप्तिङन्तं पदम्**[24] इति पदसंज्ञा तु तिङन्तस्य भवति, पचतु इति रूप-सिद्धौ कथं तावत् पदसंज्ञा इति **सुप्तिङन्तं पदम्**[25] इति सूत्रस्य अव्याप्तिः। अत्र प्रकृत-दोषस्य निवारणं तावत् एक **देशविकृतमनन्यवद्भवति**[26] इति परिभाषया एकांशे विकारे न च स्वरूप-भिन्नता इति सहजतया भवति।

अतिव्याप्तौ तावत् **विपराभ्यां जेः**[27] इति सूत्रेण वि, परा इत्येवं पूर्वाद् जिधातो आत्मनेपदं विधीयते। तत्र **विजयते**, **पराजयते** इति रूप-सिद्धिः सारल्येन भवति। परं च **बहुवि जयति वनम्**, **परा जयति सेना** इत्यादि रूपेषु प्रकृतसूत्रप्रवृत्तिर्न भवति यतोहि **सहचरिताऽसहचरितयोः सहचरितस्यैव ग्रहणम्**[28] इति परिभाषया वि-परा शब्दयोः साहचर्येन ग्रहणात् उपसर्गयोरेव ग्रहणं भवति इति उपर्युक्तयोः उदाहरणयोः उपसर्ग-भिन्न-शब्द-ग्रहणात् न तत्र प्रकृत सूत्र-प्रवृत्ति इति न च आत्मनेपदत्वम्। अत्र स्पष्टतः एव अतिव्याप्ति-रूप-दोष-निवृत्तिः।

असंभवे तावत् **जराया जरसन्यतरस्याम्**[29] इति सूत्रेण जरा इत्येतस्य जरसित्ययमादेशो भवति अन्यतरस्याम् अजादौ विभक्तौ परतः। तत्र जरसा, जरया इत्यादि रूपेषु सहजा एव सूत्र-प्रवृत्तिः,परं च निर्जरसौ, निर्जरसः इत्यादिरूपेषु निरुपसर्गत्वात् **निर्दिश्यमानस्य आदेशा भवन्ति**[30] इति परिभाषया निर्दिश्यमानस्य एव आदेश भवति, इति अत्र असंभवा सूत्र-प्रवृत्तिः। अत्र स्पष्टतया एव प्रकृतस्य सूत्रस्य अप्राप्तिः दृश्यते इति अस्मिन् परिस्थितौ एक **देशविकृतमनन्यवद्भवति**[31] इति परिभाषया समाधानं कृत्वा प्रकृत-दोषनिवृत्तिर्जायते। एतद्धि असम्भव-रूप-दोष-निवारणस्योदाहरणम्।

**भेदाः-** सामान्यतः परिभाषाविभागः द्विधा क्रियते - 1. सूत्ररूपेणठिताः परिभाषाः, 2. ज्ञापिताः परिभाषाः। पारिभाषया प्रायशः द्वितीयविधायाः एव ग्रहणं भवति। एताश्च सूत्रपाठात् बहिर्भूताः सत्यपि सूत्रज्ञापितत्वात्, न्यायसिद्धत्वात्, लोकविदितत्वात् अथवा सूत्रकारद्वारा तन्मन्तव्यानुसारं स्वीकरणत्वात् च प्रामाण्यत्वप्रसंगे सूत्रवदेव स्वीक्रियन्ते अथ च सूत्रवदेव सर्वे व्यवहाराः साध्यन्ते इति प्रामाण्याविरोधः। द्वितीयप्रकारकाः अपि एताः ज्ञापिताः परिभाषा तावत् चतुर्धा विभज्यन्ते 1. ज्ञापकसिद्धाः, 2. न्यायसिद्धाः, 3. वाचनिक्यः, 4. मिश्रिताश्च ।

1. **ज्ञापकसिद्धाः –** यत्र शास्त्रेण (सूत्रेण) शास्त्रैकदेशेन/सूत्रैकदेशेन वा केचन विशिष्टनियमाः व्यंजनया वृत्या ध्वनिता भवन्ति तत्रैव खलु ज्ञापकसिद्ध-परिभाषाणामवसरः। सूत्रकारेण केवलमविधयैव न

सर्वम् अभिहितमपितु लक्षणया व्यंजनया वापि साक्षाद् अनुक्ता अपि विषया विज्ञाप्यन्ते लक्ष्यन्ते वा। उक्तं हि तावत् भाष्यकारेणापि-

**इहेंगितेन चेष्टितेन निमिषितेन महता वा**
**सूत्रनुबन्धनेन आचार्याणामभिप्रायो लक्ष्यते**[32] ।

पाणिनेराचार्यस्य मनोगतानां भावानां अनुसारमेव तत् तत् सूत्रं सूत्रपदं वा सार्थकतामवाप्नोतीति निश्चप्रचमेतत् अन्यथा हि तत् तत् सूत्रपदं सर्वमेव वा सूत्रजातमनर्थकं स्यादिति। एतस्मादेव एताः परिभाषाः वैयाकरणैः अनुक्ताः अपूर्वाः वा न स्वीक्रियन्ते अपितु परोक्षरूपेण आचार्यप्रोक्ता एवोच्यन्ते। यथा हि **नानुबन्धकृतमनेकाल्त्वम्**[33], **नानुबन्धकृतमसारूप्यम्**[34] एवं विधानां परिभाषाणां बाहुल्यं दृश्यते।

यथा हि **अनेकाल्शित सर्वस्य**[35] इति सूत्रेण अनेकाल अथ च शित यो आदेशः स सर्वस्य स्थाने भवति इति प्रतिपादितमस्ति इति स्वीकृते **इदम इश्**[36] इति इश्, **अष्टाभ्य औश्**[37] इति च औश् आदेशः शकार-सहितत्वात अनेकालेव, यतो हि अनुबन्धा येन सह पठिता, **एकान्ता अनुबन्धाः**[38] इति प्रमाणेन, तस्य अवयव-रूपेणैव स्वीक्रियन्ते, तदा तत्र सूत्रे शिद् ग्रहणस्य आनर्थक्यं स्पष्टतयैव प्रतिभाति अथ च वैयर्थ्यमपि। परंच सूक्ष्मेक्षया विचारिते इदं हि नैश्चित्यं गच्छति यद् पाणिनीये शास्त्रे नाक्षरमपि व्यर्थीभूतमिति, शिद्ग्रहणे कश्चिद् विशेष एव उद्देश्य अनुस्यूतः। **व्याख्यानतो विशेष प्रतिपत्तिर्न संदेहादलक्षणम्**[39] इति विशिष्टे व्याख्याने कृते विशिष्ट एव भाव निःसृतो भवति। अत्रापि प्रकृष्टे व्याख्याने कृते इदं च ज्ञायते यद् शिद् ग्रहणं व्यर्थं प्रतिभाति, पुनरपि आचार्यः ग्रहणं करोति इति ज्ञापनार्थमेव ग्रहणमिति निश्चप्रचमेतत, किं च ज्ञाप्यते? **नानुबन्धकृतमनेकाल्त्वमिति**[40] अर्थात अनुबन्ध-सहितत्वेन यदनेकाल्त्वं जायते तन्न स्वीक्रियते इह शास्त्रे, अपितु अनुबन्धेन सह यदनेकाल तदेव गृह्यते। तेन **इश्, औश्** इत्यादय आदेशा इह शास्त्रे एकाल एव, एवं च सत्यां सूत्रेऽस्मिन शिद् ग्रहणं सार्थकमिति नात्र वैयर्थ्य-प्रसंगः। परिभाषैषा एकान्त-पक्षे एव, अपरे पक्षे न च ज्ञापकार्थम्।

2. **न्यायसिद्धाः -** येन प्रकारेण मनुष्याणां सहजप्रवृत्तिर्भवति यद्वा येन नियमेन किंचिदिष्टं प्रति नीयते इष्टं वा प्राप्यते स एव न्याय इति नाम्ना कथ्यते, अथ च अनिष्टनिवारका, इष्टप्रापका, सर्वसुखदायका वा नियमा एव न्याय शब्देन उच्यन्ते। लोके ये केचन नियमा सर्वसुखबोध्याः भवन्ति ते कदाचित तथैव इह व्याकरणादिशास्त्रेष्वपि आश्रीयन्ते। ते व्याकरणशास्त्रनियमा एव लोकन्यायसिद्धा इत्युच्यन्ते। यथा- **सन्निपातलक्षण-विधिरनिमित्तं तद्विघातस्य**[41], **असिद्धं बहिरंगमन्तरंगे**[42], **सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम्**[43]।

शतानि इति रूपसिद्धौ **शत+शि** इत्यवस्थायां **नपुंसकस्य झलचः**[44] इति सर्वनामस्थाने शि-प्रत्यये नुमि कृते **शतन्+शि** इत्यवस्थायां **ष्णान्ता षट्**[45], **षड्भ्यो लुक्**[46] इति शेर्लुक् प्राप्नोति, लोपे च जाते कथं तावत इष्ट-रूप-सिद्धिः? इत्यत्र न्यायसिद्धा परिभाषेयं सुष्ठु समादधाति। कथं तावत? उच्यते-

**सन्निपातलक्षण-विधिरनिमित्तं तद्विघातस्य**[47]। कस्यचित आश्रयेण यो हि अन्यस्य सम्बन्धो जायते स च सन्निपातः। लक्षणः=निमित्तः,अनया परिभाषया इदं हि सुस्पष्टं भवति यत

सन्निपातनिमित्तको विधिः एवं भूतस्य विधिशास्त्रस्य निमित्तं न भवति यत् हि तस्य सन्निपातस्य विघातको भवति। अत्र प्रकृत-प्रसंगे शतन्+शि इत्यत्र शतशब्दस्य नान्तत्वं तावत् शि-निमित्तमेव, नान्तत्वे तस्य शेरेव **षडभ्यो लुक्**[48] इति लुक् प्राप्यते, एतद्धि लोकवदेव न च शास्त्रेऽपि युक्तः। किंच लोके इति? लोके उपजीव्येन उपजीवकस्य विघातक-व्यहारः, न च युक्त इति। यथा यः कोऽपि यस्य पुरुषस्य धनेन धनवान् भवति, धनवति च जाते सः दातारमेव विघातयेदिति न च युक्तः, लोके निन्दितश्चैषः व्यवहार इति स्वीक्रियते। एष एव लौकिकः न्यायः अस्याः परिभाषायाः मूलमिति, तन्न भवति इति **शतानि** इति इष्ट-रूप-सिद्धिः।

**वाचनिक्यः –** न्यायाद् ज्ञापकाद् वा व्यतिरिक्ता परिभाषाः अथवा वाचनिक्यश्च ता परिभाषाः उच्यन्ते या न तु सूत्र-ज्ञापिता न च वा न्याय-सिद्धा एव अपितु अचार्याणां वचनरूपाः साक्षादेव सूत्र-रूपाः पठिताः, अथ च भाष्यकृद्भिः, वार्तिककृद्भिः वा आचार्यैः कुत्रचिदपि पठिता ता अपि अस्मिन् भेदे परिगणिता भवन्ति। यथा- **तस्मिन्निति निर्दिष्टे पूर्वस्य**[49], **तस्मादित्युत्तरस्य**[50], **आद्यन्तौ टकितौ**[51], **पूर्व-पर-नित्यान्तरंगानामुत्तरोत्तरो बलीयः**[52], **यस्मिन् विधिस्तदावल्ग्रहणे**[53] इत्यादयः।

यथा हि **सुधी+उपास्यः** अत्र **इको यणचि**[54] इति सूत्रेण इकः स्थाने यण भवति अचि परतः इति कथ्यते, अत्र पूर्वपदे इक्यमस्ति तद्दृष्टवा इयं शंका भवति यत् अचि परतः कस्य इकः स्थाने यण स्यात्, प्रथमस्य अथवा द्वितीयस्य स्थाने वा? अत्र **तस्मिन्निति निर्दिष्टे पूर्वस्य**[55] इति परिभाषा-सूत्रं समादधाति, सूत्रार्थं व्यवस्थापयन् कथयति, पूर्वस्य इति अव्यवहितपूर्वस्य इकः स्थाने यणादेशः भवति। उपास्य-स्थितस्य अचि परतः तदव्यवहितपूर्वस्य सुधी- स्थितस्य धकारोत्तरवर्तिनः ईकारस्य स्थाने एव यणादेशो भवति, पूर्वे कृते धकारस्य बाधात् यणादेशाप्राप्तिः।

मुख्यरूपेण एष एव त्रिविधः विभागः परिभाषाणां क्रियते, पुनरपि गौणरूपेण तावत् परिभाषाणाम् अष्टधा विभागः प्रायशः क्रियते, तासामपि संक्षेपेण विवरणमत्र प्रस्तूयते। गौणस्तावद् विभागः- 1. ग्रहण-नियमार्थाः, 2. बलीयस्त्व-नियमार्थाः, 3. प्रयोगसाधुत्व-नियमर्थाः, 4. विकल्प-विधायिन्यः, 5. कार्यि-नियमार्थाः, 6. अतिदेश-विधायिन्यः, 7. अनुबन्ध-विधायिन्यः, 8. प्रकीर्ण-विषयाश्च।

1. **ग्रहण-नियमार्थाः -**यत्र कुत्रचित् ग्रहणावसरेषु याभिः परिभाषाभिः कश्चिद् विशेष एव नियमः क्रियते/विधीयते ता ग्रहण-नियमार्थाः परिभाषा इति स्वीक्रियन्ते। यथा **वनो र च**[56] इत्यत्र वन्नन्तात् प्रातिपदिकात् ङीप् सन्नियोगेन र-विधानं क्रियते, तत्र **अर्थवद् ग्रहणे नानर्थकस्य**[57] इत्यनया परिभाषया अर्थवत एव धीवन् इति वन्नन्तात् र-विधानं भवति। अनर्थकाद् वन्नन्तात् अतिश्वन् इत्यादि-शब्देभ्यः न कदापि भवति। अत्र ग्रहण-नियमार्थ एव अस्या पारिभाषाया प्रवृत्तिः भवति इति स्पष्टः।
2. **बलीयस्त्व-नियमार्थाः –** यत्र च युगपदेव कदाचिद् अनेके विधयः प्राप्नुवन्ति, तत्र सूत्र-प्रवृत्यर्थं कश्चिद् पौर्वापर्य-विधान-पुरस्सरं बलीयस्त्व-नियमः क्रियते, येन सूत्र-प्रवृत्तिः यथाक्रमं भवेत्,

रूप-सिद्धिश्च यथेष्टं वा स्यादिति ता एव परिभाषा बलीयस्त्व–नियमार्थाः इत्युच्यन्ते। यथा- **पूर्व-पर-नित्यान्तरंगानामुत्तरोत्तरो बलीयः**[58] इत्यनया परिभाषया पूर्वादीनां प्रवृत्ति-क्रम-निर्धारणं विविधेषु स्थलेषु क्रियते।

3. **प्रयोगसाधुत्व-नियमर्थाः** – काश्चन परिभाषाः तावत् प्रयोगाणां साधुत्व-प्रकल्पनार्थं भवन्ति, ता अत्र पठ्यन्ते। यथा **सन्निपातलक्षण-विधिरनिमित्तं तद्विघातस्य**[59] इति परिभाषा शतानि, सहस्राणि इत्यादि-रूपाणां साधुत्वमेवावधारयति न पुनः कष्टाय, रामाय आदिषु प्रसृजति।
4. **विकल्प-विधायिन्यः –** अनेकत्र सूत्रेषु उपदिष्टानां विधीनां नित्यत्वेन गतिर्भवति, काचित् तादृशेषु स्थलेषु याभिः परिभाषाभिः विकल्प-विधानं क्रियते, ता एव खलु विकल्प-विधायिन्यः परिभाषाः। यथा- **सर्वो द्वन्द्वो विभाषैकवद् भवति**[60], **सर्वे विधयः छन्दसि विकल्प्यन्ते**[61], **समासान्तविधिरनित्यः**[62] इत्यादयः।
5. **कार्यि-नियमार्थाः-** सूत्रेषु प्रायशः तावत् कार्यि-निर्देशः समान्यरूपेण एव क्रियते, तत्रैव याभिः परिभाषाभिः कार्यीणां विशेषरूपेण अवधारणं भवति, ता एव कार्यि-नियामकाः परिभाषाः। यथा- **धातोः कार्यमुच्यमानं तत्प्रत्यये भवति**[63] इत्यनया परिभाषया धातोः विहिते प्रत्यये, इत्यस्य भावः अस्ति यत् धातोः इति धातुशब्दमुच्चार्य विहिते प्रत्यये एव कार्याणि भवन्ति इति अवगन्तव्यम् । तद्यथा **हनस्तो चिण्णलोः**[64] इति हन् धातोः विहितः तकारादेशः भ्रौणहन्+ ष्यञ् इत्यत्र प्रातिपदिकात् न भवति।
6. **अतिदेश-विधायिन्यः –** याभिः परिभाषाभिः कुत्रचित् अतिदेशानां विधानं क्रियते, ता एव अतिदेश-विधायिन्यः परिभाषा इति स्वीक्रियन्ते। यथा- **व्यपदेशिवदेकस्मिन्**[65], **व्यपदेशिवद्भावोऽप्रातिपदिकेन**[66], **प्रकृतिवदनुकरणं भवति**[67], **एकदेशविकृतमनन्यवद्भवति**[68], इत्यादयः। तत्र पचतु, भवतु इत्यादिषु रूपेषु **एरुः**[69] इति सूत्रेण तिङन्तस्थस्य इकारस्य उकारे कृते कथं तावत् पदसंज्ञा स्यादिति समादधातीयं परिभाषा। कथं तावदिति **एकदेशविकृतमनन्यवद्भवति**[70] इत्यनया यत्र हि कश्चिदेकः अथवा कश्चिदंशः अन्यथात्वं भजते, न तेन समुदायो अन्यो भवति, अपितु तदेव इति पदशंज्ञायां न काचित् बाधेति। लोकेऽपि कस्यचित् शुनः कर्णे, पुच्छे वा छिन्ने न हि अश्वो गर्दभो वा जायते, अपितु स एव।
7. **अनुबन्ध-विधायिन्यः -** याभिस्तावत् अनुबन्धानां व्यवस्थापनं साधुः भवति ता एव अनुबन्ध-विधायिन्यः परिभाषा इति उच्यन्ते। यथा- **एकन्ता अनुबन्धाः**[71], **अनेकान्ता अनुबन्धाः**[72], **नानुबन्धकृतमनेकाल्त्वम्**[73] इत्यादयः। अत्र अनुबन्ध- विषये विविधाः सिद्धान्ताः वर्णिताः।
8. **प्रकीर्ण-विषयाः –** उपर्युक्ताः परिभाषाः विहाय, ये च अवशिष्टा ता एव विविध-विषयिण्यः परिभाषा इति उच्यन्ते। यथा **लिङ्ग-वचन-वासरूपविधि-साहचर्य** विषयाः परिभाषाः।

**पादटिप्पणयः-**

---

[1] यः कश्चित् कस्यचित् धर्मो मनुना परिकीर्तितः।
स सर्वोभिहितो वेदे सर्वज्ञानमयो हि सः॥ मनु. 2.7

[2] सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक्।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे॥ मनु. 1.21

[3] पाणिनीय-शिक्षा  कारिका सं. 41

[4] महाभाष्य पस्पशाह्निक

[5] भर्तृहरि, 1.1

[6] सूचनात् सूत्रणाच्चैव ....सूत्रस्थानं प्रचक्षते । सुश्रुत सूत्रस्थान 03

[7] तन्त्रवार्तिक, 2.3.11

[8] अल्पाक्षरमसंदिग्धं सारवद् विश्वतो मुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥ वायुपुराण, 49.142

[9] सूत्र लक्षणम् ।

[10] इको गुणवृद्धि । परिभाषेयं स्थानिनियमर्था । अतिप्रसंगे नियमो विधीयते । काशिका 1.1.3

[11] पारिभाषिक, स्वामी दयानन्द सरस्वती, आर्ष साहित्य प्रचार मण्डल, नई दिल्ली

[12] महाभाष्य, 2.1.2. आ. 01

[13] तदेव, 1.1.48

[14] नागेश भट्ट महाभाष्य- उद्योत टीका, 2.1.1

[15] हरदत्त- पदमन्जरी 3.3.103

[16] पदमंजरी-काशिका-वृत्ति, 3.3.103

[17] वार्तिकम्, 1.1.49

[18] पा. अष्टा. 1.1.49

[19] वार्तिकम्, 1.3.11

[20] परिभाषा-वृत्ति, पृ. 186

[21] परिभाषा- वृत्ति, पृ. 55

[22] परिभाषा-वृत्ति, पृ. 186

[23] पा. अष्टा. 3.4.86

[24] पा. अष्टा. 1.4.14

[25] पा. अष्टा. 1.4.14

[26] पारिभाषिकः, परि. 38

[27] पा. अष्टा. 1.3.19

[28] पारिभाषिकः, परि. 91

[29] पा. अष्टा. 7.2.10

[30] पारिभाषिकः, परि. 13

[31] पारिभाषिकः, परि. 38

[32] महाभाष्य – 8.2.3

[33] पारिभाषिक, परि. 07

[34] पारिभाषिक, परि. 08

[35] पा. अष्टा. 1.1.54

[36] पा. अष्टा. 5.3.3

[37] पा. अष्टा.7.1.21

[38] पारिभाषिक, परि. 05

[39] पारिभाषिकः, परि. 01

[40] पारिभाषिक, परि. 05

[41] पा. महा. सू. 01.01.39

[42] पारिभाषिक, परि. 44

[43] पारिभाषिक, परि. 91

[44] पा. अष्टा. 7.1.72

[45] पा. अष्टा. 1.1.23

[46] पा. अष्टा. 7.1.22

[47] पा. महा. सू. 01.01.39

[48] पा. अष्टा. 7.1.22

---

49 पा. अष्टा. 1.1.65

50 पा. अष्टा. 1.1.66

51 पा. अष्टा. 1.1.45

52 पारिभाषिकः, परि. 39

53 पारिभाषिकः, परि. 34

54 पा. अष्टा. 6.1.77

55 पा. अष्टा. 1.1.65

56 पा. अष्टा. 4.1.7

57 पारिभाषिकः, परि. 15

58 पारिभाषिकः, परि. 39

59 पारिभाषिकः, परि. 75

60 पारिभाषिकः, परि. 35

61 पारिभाषिकः, परि. 36

62 पारिभाषिकः, परि. 74

63 पारिभाषिकः, परि. 78

64 पा. अष्टा. 7.3.32

65 पारिभाषिकः, परि. 31

66 पारिभाषिकः, परि. 33

67 पारिभाषिकः, परि. 37

68 पारिभाषिकः, परि. 38

69 पा. अष्टा. 3.4.86

70 पा. महा. सू. 4.1.83

71 पारिभाषिकः, परि. 05

72 पारिभाषिकः, परि. 04

73 पारिभाषिकः, परि. 06

## संदर्भ-ग्रन्थ-सूची-


1. पारिभाषिकः, आचार्य प्रद्युम्नः, राम लाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा, 2014
2. पाणिनीय अष्टाध्यायी, राम लाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा, 2018
3. महाभाष्य, पतंजलि, (प्रदीप-कैयट) गुरुकुल झज्जर, हरियाणा, 2020 वि. सं.
4. काशिका, वामन-जयादित्य, चौखम्बा संस्कृत पुस्तकालय, वाराणसी, 1954
5. वाक्यपदीयम्, द भारतीय विद्या प्रकाशन, नई दिल्ली, वि. सं 2066
6. पाणिनीय शिक्षा, मोती लाल बनारसी दास, नई दिल्ली-11007, 2005
7. मनुस्मृति, आर्ष साहित्य प्रचार ट्रस्ट, खारि बावली, नई दिल्ली-
8. पारिभाषिक, (हिन्दी व्याख्या) स्वामी दयानन्द सरस्वती, आर्ष साहित्य प्रचार मण्डल, नई दिल्ली
9. वायु पुराण, श्रीराम शर्मा आचार्य, संस्कृति संस्थान, बरेली, सन 1969